श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री कवितार्किकसिंह सर्वतन्त्रस्वतन्त्र वेदान्तचार्य कृतिषु

# ॥ द्रमिडोपनिषत्सारः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness* śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ द्रमिडोपनिषत्सारः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

सेवायोग्योऽतिभोग्यश्शुभसुभगतनुस्सर्वभोग्यातिशायी
श्रेयस्तद्धेतुदाता प्रपदनसुलभोऽनिष्टविध्वंसशीलः।
भक्तच्छन्दानुवर्ती निरुपधिकसुहृत्सत्पदव्यां सहायः
श्रीमान् सर्वोचितायामुपनिषदि मिषत्येष गाथाशतैर्नः॥ 1 ॥

आद्ये पश्यन्नुपायं प्रभुमिह परमप्राप्यभूतं द्वितीये
कल्याणोदारमूर्तेर्द्वितयमिदमिति प्रेक्षमाणस्तृतीये।
ऐश्वर्यादेश्चतुर्थे विषमधुतुलयाऽनन्यभोग्यत्वमिच्छन्
षड्भिस्स्वां पञ्चमाद्यैरनितरगतितामाचचक्षे मुनीन्द्रः॥ 2 ॥

परं निर्वैषम्यं सुलभमपराधप्रसहनं
सुशीलं स्वाराधं सरसभजनं स्वार्जवगुणम्।
सुसात्म्यस्वानन्दप्रदमनघविश्राणनपरं
मुकुन्दं निध्यायन् मुनिरधिजगावाद्यशतके॥ 3 ॥

द्विकाभ्यां द्व्यष्टाङ्घ्रिर्दुरधिगमनीतिस्स्थपुटिता
यदन्त्या मीमांसा श्रुतिशिखरतत्वं व्यवृणुत।
तदादौ गाथाभिर्मुनिरधिकविंशाभिरिह नः
कृती सारग्राहं व्यतरदिह सङ्गृह्य कृपया॥ 4 ॥

परत्वाद्यैरित्थं परिचरणसक्तो गुणगणैः
प्रभुं सेवायोग्यं प्रथमशतके वीक्ष्य वरदम्।

तमेव स्वात्यर्थप्रियमथ च भोक्तुं व्यवसितो
    वरेण्यत्वं तस्य प्रथमवरणीयं प्रथयति ॥ 5 ॥

द्वितीयेऽतिक्लेशक्षणविरहमुत्तुङ्गललितं
    मिलत्सर्वास्वादं व्यसनशमनं स्वाप्तिमुदितम्।
स्ववैमुख्यत्रस्तं स्वजनसुहृदं मुक्तिरसदं
    स्वकैङ्कर्योद्देश्यं सुभगसविधस्थं निरविशत्॥ 6 ॥

उपायत्वैकान्तं प्रथममिह सेव्यत्वमुदितं
    ततश्च प्राप्यत्वौपयिकमतिभोग्यत्वमवदत्।
द्वयं तत्स्वासाधारणतनुविशिष्टस्य गणयन्
    तृतीये विश्वेशं शुभसुभगरूपं कथयति ॥ 7 ॥

अनीदृक्सौन्दर्यं तनुविहितसर्गादिसुभगं
    स्वसेवार्थाकारं प्रगुणवपुषं मोहनतनुम्।
अपश्यल्लभ्यार्चाविभवमतिदास्यावहतनुं
    सदा दृश्यं स्तुत्याकृतिमघविरुद्धाकृतिमिह ॥ 8 ॥

श्रियः कान्तोऽनन्तश्शुभतनुविशिष्टः फलमसौ
    फलावाप्तेर्हेतुः स्वयमिति च निर्द्धार्य शतकैः।
इदानीं बुद्धिस्थक्रमत इह युक्त्या मुनिवरः
    फलत्वं तस्यैव द्रढयति तदन्येषु विमुखः ॥ 9 ॥

स्थिरैश्वर्यं तुर्ये सहजबहुभोग्यं निरविशत्
    मिथःश्लिष्टं क्लेशावहसहिततुल्यं निजजनम्।
कृतार्थीकुर्वन्तं प्रणयिभिषजं सद्बहुगुणं
    स्वहेयस्वोपेक्ष्यं स्वमतफलमुच्चैस्स्ववगतम्॥ 10 ॥

उपायत्वं यत्तत्प्रथमशतकेऽभाव्यत विभोः
अनन्योपायस्तद् दृढयति परं पञ्चममुखैः।
निरीहस्तत्रादौ निरवधिकनिर्हेतुकदया -
सरित्स्रोतः पद्मं शरणयति नाथस्य चरणम्॥ **11** ॥

दयानिघ्नं भक्तैरघविमथनं प्रेमजनकं
जगद्रक्षादीक्षं स्मृतिजुषमहम्भावविषयम्।
शरण्यं दीनानां स्वरसकृतदास्याभ्युपगमं
प्रचख्यौ तं प्राप्तं प्रशकनकृतं पञ्चमशते॥ **12** ॥

अनाद्यन्तानन्दस्वरसकरुणाकन्दजनितः
प्रणेतुर्व्यापारः प्रपदनविपाकार्ह उदितः।
तमाचार्योपज्ञं चिरविरहितस्वात्मघटन -
स्फुरच्छक्तिं षष्ठे मुनिरशरणो याति शरणम्॥ **13** ॥

गुरुद्वारोपेयं स्वयमभिमतं वैरिघटकं
चरित्रैः कर्षन्तं परविघटनं स्वान्वितहरम्।
निदानं धृत्यादेर्घटकवशभूतिद्वयमगात्
अनर्हद्वैघट्यं त्वविकलशरण्यस्थितिमिह॥ **14** ॥

तदेवं षष्ठान्ते विहितसविशेषप्रपदनः
फलालाभात् खिन्नस्त्वरितहृदयस्सप्तमशते।
अनिष्टोपन्यासप्रभृतिभिरनिष्टप्रशमने
स्वतस्सिध्यच्छीलं प्रभुमभिमुखं संमुखयति॥ **15** ॥

सहन् शाठ्याशङ्कामुपशमितगर्हः प्रकटयन्
स्वगोप्तृत्वं गुप्तिक्रममखिलजन्तुप्रणयिताम्।
श्रिताक्रन्दच्छेत्तास्मरणविशदश्चित्रविभवः
स्तुतौ युञ्जन् स्तोतृव्यसनजिददर्शि प्रभुवरः॥ **16** ॥

अथानिष्टान् पुंसां स्वयमुपजिहीर्षन्नपि विभुः
तदिच्छां बाह्येषु प्रशमयितुकामः क्रमवशात्।
निजेच्छासंसिद्धत्रिविधचिदचिद्वस्तुविततिः
श्रितेच्छावैचित्रीवश इति वदत्यष्टमशते॥ 17॥

दिदृक्षायां दृश्यः प्रभुरगणि निस्सङ्गसुलभः
स्वविश्लेषे कान्तः श्रुतिविहितपौष्कल्यविभवः।
अपेक्षासापेक्षस्ववितरणसज्जो हृदि रतः
स्वदास्यं तन्निष्ठां तदवधिमपीह प्रकटयन्॥ 18॥

अभीष्टं विश्वस्मिन् विषमफलकाङ्क्षिण्यविषमम्
प्रयच्छन्तं दृष्ट्वा परमपुरुषार्थैकरसिकः।
निरस्तान्यापेक्षो निखिलजगदीशस्य नवमे
निदानं सिद्धीनां निरुपधिसुहृत्त्वं गणयति॥ 19॥

अभाव्येको बन्धुश्चिरकृतदयश्शीलजलधिः
स्वसंबन्धात् गोप्ता स्वगुणगरिमस्मारणपरः।
अशक्यो विस्मर्तुं घटकमुखविस्रम्भविषयः
सुमज्जानिः सिद्ध्युन्मुखसमय इच्छन्नवसरम्॥ 20॥

उदन्तैरित्येवं निरुपधिकसौहार्दपिशुनैः
उदन्यामुद्वेलामुपजनितवन्तं निजपदे।
त्रिवर्गातिक्रान्तस्थिरनगरघण्टापथगतेः
सहायीकुर्वाणश्चरमशतके विन्दति मुनिः॥ 21॥

गतिं व्यध्वक्लेशच्छिदमपद शङ्कास्पदरसं
भजद्भिस्सुप्रापं विविधभजनप्रक्रियमिह।
फले तीव्रोद्योगं स्वविषयकृतात्यादरमगा -
द्यदृच्छातुष्टं सत्सरणिमपुनर्जन्मसयुजम्॥ 22॥

परं प्राप्यं पश्यन् परिचरणहेतुं विगणयन्
    परिष्कुर्वन्नाज्ञामनितरशरण्यश्शरणयन्।
अनिष्टप्रध्वंसप्रभृतिषु निदानं च कथयन्
    मुहुर्देवं लक्ष्म्या सहितमिह भेजे मुनिवरः॥ **23** ॥

पुरा शोकश्श्लोकोऽभवदिति नयादित्युपनिषत्
    मुनेः पुण्यश्लोकादजनि परभक्तेः परिणतिः।
व्यपोह्य स्वं भावं हरिचरणसन्तानकलिकां
    अविक्षद्योगी यस्तनुमतनुकारुण्यविवशः॥ **24** ॥

सतामित्थं सारं द्रमिडनिगमस्यान्वकथयत्
    बहूनां विद्यानां बहुमतिपदं वेङ्कटपतिः।
दिशासौधश्रेणीदृढघटितजैत्रध्वजपटी -
    परामर्शभ्रश्यत्प्रतिमतनिराबाधनिगमः॥ **25** ॥

मनुव्यासप्राचेतसपरिषदर्हा क्वचिदियं
    सुधासिक्ता सूक्तिः स्वयमुदयमन्विच्छति जने।
निरुन्ध्युः के विन्ध्याचलविकटसन्ध्यानटजटा -
    परिभ्रान्ता पङ्गोरुपरि यदि गङ्गा निपतति॥ **26** ॥

॥ द्रमिडोपनिषत्सारः समाप्तः॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥